# श्रीराधाकृष्णाष्टोत्तरशतनामावलिः

shrIrAdhAkRRiShNAShTottarashatanAmAvaliH

sanskritdocuments.org

May 6, 2018

shrIrAdhAkRRiShNAShTottarashatanAmAvaliH

# श्रीराधाकृष्णाष्टोत्तरशतनामावलिः

## Sanskrit Document Information

Text title : rAdhAkRRiShNAShTottarashatanAmAvaliH

File name : rAdhAkRRiShNAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, radha, krishna

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 6, 2018

*sanskritdocuments.org*

# श्रीराधाकृष्णाष्टोत्तरशतनामावलिः

ॐ राधिकारमणाय नमः । राधास्वान्तस्थाय । राधिकापतये ।
राधामुखाब्जमार्ताण्डाय । राधिकारतिलोलुपाय । राधाधरसुधासक्ताय ।
राधाप्रस्तावसादराय राधासनसुखासीनाय । राधारमितविग्रहाय ।
राधासर्वस्वभूताय । राधालिङ्गनतत्पराय । राधासंलापमुदिताय ।
राधाकृतनखक्षताय । राधावरोधनिरताय । राधिकास्तनशायिताय ।
राधिकासहभोक्त्रे । राधासर्वस्वसम्पुटाय । राधापयोधरासक्ताय ।
राधालीलाविमोहिताय । राधिकानयनोन्नेयाय नमः ॥ २०

ॐ राधानयनपूजिताय नमः । राधिकानयनानन्दाय । राधिकाहृदयालयाय ।
राधामङ्गलसर्वस्वाय । राधामङ्गलकारणाय । राधिकाध्यानसन्तुष्टाय ।
राधाध्यानपरायणाय । राधाकथाविलासिने । राधानियमितान्तराय ।
राधाचित्तहराय । राधास्वाधीनकरणत्रयाय । राधाशुश्रूषणरताय ।
राधिकापरिचारकाय । राधिकावासितस्वान्ताय । राधिकास्वान्तवासिताय ।
राधिकाकलिताकल्पाय । राधाकल्पितभूषणाय । राधिकाहृदयानन्दाय ।
राधाकूतविनोदवते । राधिकानयनाधीनाय नमः ॥ ४०

ॐ राधिकानिहितेक्षणाय नमः । राधाविलासमुदिताय ।
राधानयनगोचराय । राधापाङ्गहताय । राधापाङ्गविभ्रमवञ्चिताय ।
राधिकापुण्यनिवहाय । राधिकाकुचमर्दनाय । राधिकासङ्गमश्रान्ताय ।
राधिकाबाहुसन्धिताय । राधापुण्यफलाय । राधानखाङ्कपरिमण्डिताय ।
राधाचर्चितगन्धाढ्याय । राधादृतविलासवते । राधालीलारताय ।
राधाकुचमण्डलशायिताय । राधातपःफलाय । राधासङ्क्रान्ताय ।
राधिकाजयिने । राधानयनविक्रीताय ।
राधासंश्लेषणोत्सुकाय नमः ॥ ६०

ॐ राधिकावचनप्रीताय नमः । राधिकानर्तनोद्यताय ।
राधापाणिगृहीत्रे । राधिकानर्मदायकाय । राधातर्जनसन्तुष्टाय ।

राधालिङ्गनतत्पराय । राधाचरित्रगायिने । राधागीतचरित्रवते ।
राधिकाचित्तसम्मोहाय । राधामोहितमानसाय । राधावश्यमतये ।
राधाभुक्तशेषसुभोजनाय । राधाकेलिकलासक्ताय ।
राधिकाकृतभोजनाय । राधाभ्यञ्जनपारीणाय ।
राधाक्ष्यञ्जनचित्रिताय । राधिकाश्रवणानन्दवचनाय ।
राधिकायनाय । राधिकामङ्गलाय । राधापुण्याय नमः ॥ ८०

ॐ राधायशःपराय नमः । राधाजीवितकालाय । राधिकाजीवनौषधाय ।
राधाविरहसन्तप्ताय । राधाबर्हिणीनीरदाय । राधिकामन्मथाय ।
राधास्तनकुङ्मलमोहिताय । राधिकारूपविक्रीताय ।
राधालावण्यवञ्चिताय । राधाक्रीडावनावासिने । राधाक्रीडाविलासवते ।
राधासन्नुतचारित्राय । राधाचरितसादराय । राधासङ्कल्पसन्तानाय ।
राधिकामितदायकाय । राधिकागण्डसंसक्तराकाचन्द्रमुखाम्बुजाय ।
राधिकाक्ष्यञ्जनापीच्यकोमलाधरविद्रुमाय ।
राधिकारदसन्दष्टरक्तिमाधरमञ्जुलाय ।
राधापीनकुचद्वन्द्वमर्दनोद्युक्तमानसाय ।
राधाचरितसंवादिवेणुवादनतत्पराय नमः ॥ १००

ॐ राधिकामुखलावण्यसुधाम्भोनिधिचन्द्रमसे नमः ।
राधिकासदनोद्यानजलक्रीडाविहारवते ।
राधिकाकुचकस्तूरीपत्रलेखनतत्पराय । राधिकाकारितेङ्गिताय ।
राधाभुजलताश्लिष्टाय । राधिकाकार्यकारिणे । राधिकाकारितेङ्गिताय ।
राधाभुजलताश्लिष्टाय । राधावसनभूषिताय नमः ॥ १०८

राधिकारमणस्योक्तं पुण्यमष्टोत्तरं शतम् ।
इदं यः कीर्तयेन्नित्यं स सर्वफलमाप्नुयात् ॥

इति श्रीराधाकृष्णाष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIrAdhAkRRiShNAShTottarashatanAmAvaliH*

pdf was typeset on May 6, 2018

Please send corrections to *sanskrit@cheerful.com*